कर्म्म बहुभिः कर्म्मभेदतः। नरश्चेत् कृषिगोरक्षावाणिज्यञ्चाप्यनुष्ठितौ। संशयं लभते किञ्चित्तेन राजा विगर्ह्यते। धनिनः पूजयेन्नित्यं पानाच्छादनभोजनैः। वक्तव्याश्चानुगृह्णीध्वं प्रजाः सह मयेति वै। अङ्गमेतन्महद्राजन्ये धनिनो नाम भारत!। ककुदं सर्वभूतानां धनस्थो नात्र संशयः। प्राज्ञः शूरो धनस्थश्च स्वामी धार्म्मिक एव च। तपस्वी सत्यवादी च बुद्धिमांश्चापि रक्षति। तस्मात् सर्वेषु भूतेषु प्रीतिमान् भव पार्थिव!। सत्यमार्ज्जवमक्रोधमानृशंस्यञ्च पालय। एवं दण्डञ्च कोषञ्च मित्रं भूमिञ्च लप्स्यसे। सत्यार्ज्जवपरो राजन्मित्रकोषबलान्वितः"। १६तदाधारे गृहे जटा० (खाजनाघर) "तस्मात्द्विजेभ्योदत्त्वार्द्धमर्द्धं कोषे निवेशयेत्" मनुः। १७मेघे निघ०।

**कोश(ष)कार** पु० कोशं(षं)करोति कृ—ण्वुल् उप०स०। १खड्गाद्यावरणकारके स्त्रियां टाप् सि०कौ० तस्य पत्नी ङीष्। मुग्धबोधमते ईप्। "नैर्ऋत्यै कोषकारीम्" यजु० ३०।१४। "खड्गावरणकोश(ष)कारिणीम् स्त्रियम्" वेददी०। २इक्षुभेदे शब्दरत्ना०। कोषं स्ववेष्टनं तन्तुभिः करोति कृ—अण्। ३कीटभेदे (गुटिपोका)। "संवेष्टमानं बहुभिः मोहात्तन्तुभिरात्मजैः। कोषकारमिवात्मानं वेष्टयन्नाववध्यते" भा०शा० २२१अ०।

**कोश(ष)कृत्** त्रि० कोषं खड्गाद्यावरणं वेष्टनं वा करोति कृ—क्विप् ६त०। १कोषकारार्थे। २इक्षुभेदे सुश्रुतः "नैपालो दीर्घपत्रश्च नीलपोरोऽथ कोषकृत्" सुश्रु० इक्षुभेदोक्तौ

**कोश(ष)चञ्चु** पु० कोशः चञ्चौ यस्य। सारसपक्षिणि शब्दच०

**कोश(ष)पाल** पु० कोषं राज्याङ्गधनसंचयं पालयति पालि—अण् उप०स०। कोषरक्षके तल्लक्षणमुक्तं हेमा० परि०ख० लक्षणसमुच्चये। "धातुवस्त्राजिनादीनां रत्नानां प्रविभागवित्। विज्ञाता फल्गुसाराणामसंहार्य्यः शुचिः सदा। निपुणश्चाप्रमत्तश्च धनाध्यक्षः प्रकीर्त्तितः। आयद्वारेषु सर्व्वेषु धनाध्यक्षसमा नराः। व्ययद्वारेषु च तथा कर्त्तव्याः पृथिवीक्षिता। आयव्ययज्ञो कोशज्ञो देशोत्पत्तिविशारदः। कृताकृतज्ञो भृत्यानां ज्ञेयः स्यादर्थरक्षकः"। "निर्यान्तु कोश(ष)पालाश्च कुरुक्षेत्राश्रमं प्रति" भा० आश्र० २२अ०। ण्वुल् कोश(ष)पालकोऽप्यत्र।

**कोश(ष)फल** न० कोशे(षे)फलमस्य। कक्कोले अमरः। २महाकोषातक्याम् स्त्री अजा० टाप्। ३त्रपुष्यां च स्त्री राजनि० गौरा० ङीष्।

**कोशयी** पु० कुश—बा० अयी। स्वर्णादिपूर्णे। "कोशयीरिव वाजिनोऽदात्" ऋ० ६।४७।२२। छान्दसः प्रयोगः

**कोश(स)ला** स्त्री कुश(स) वृषा० कल नि० गुणः। १सरयूतटस्थायामयोध्यायां पुर्य्यां २तद्युक्ते देशे पु०ब०व०। "कुन्तलाः काशिकोश(स)लाः" भा० भी०९अ० जनपदकथने। पूर्व्वदिक्स्थदेशभेदेषु प्राच्यकोशलेषु पु०ब०व० ते च कोशलकावर्द्धमानश्च" वृ०स० कर्म्मविभागे पूर्व्वस्यामुक्ताः। कचिदेकत्वमपि। "कोश(स)लोनाम मुदितः स्फीतोजनपदो महान्। निविष्टः सरयूतीरे प्रभूतधान्यसमृद्धिमान्" रामा० १।५।५। कोशलदेशो द्विविधः प्राच्योत्तरभेदात् तत्र अयोध्यायुक्तदेशस्योत्तरकोशलत्वम् "पितुरनन्तरमुत्तरकोशलान्" "तस्मै विसृज्योत्तरकोश(स)लानाम्" "प्रियासखीरुत्तरकोशलेश्वरः" रघुः प्राच्यकोशलास्तु कोसलशब्दे वक्ष्यते। तद्देशस्य राजा ञ्य। कौस(श)ल्य कोशलदेशनृपे। "कौ(श)सल्यइत्युत्तरको(श)सलानाम्" रघुः स्त्रियां टाप् कौसल्या। "कौसल्यानन्दिवर्द्धनोरामः" रामा०

**कोश(स)लात्मजा** स्त्री कोश(स)लाः पूर्व्वकोश(स)लदेशः लक्षणया तदधिपः तस्यात्मजा। प्राच्यकोसलाधिपदुहितायाम् राममातरि शब्दर०

**कोशलिक** न० कुशलाय कर्म्मणे दीयते ठक् पृषो० ओत्त्वम्। निजकार्य्यसाधनार्थं राजादिकार्य्यकरेभ्योदीयमाने उत्कोचे (घुस) हेम० कौशलिकमिति पाठान्तरं साधु

**कोश(ष)वत्** त्रि० कोषः(शः) अस्त्यस्य मतुप् मस्य वः। १कोश(ष)युक्ते। "धर्म्मात्मा कोषवांश्चापि देवराज इवापरः" भा० आनु० २अ०। स्त्रियां ङीप् कोश(ष)वती सा च २कोषातकीवृक्षे "दन्तीयुतं वा मगधोद्भवानां कल्कं पिबेत् कोषवतीरसेन" "शुकाख्याकोषवत्योश्च मूलं मदन एव च" "जीमूतकैः कोशवतीफलैश्च दन्तीद्रवन्तीत्रिवृताभिश्चैव" इति च सुश्रु०

**कोश(ष)वासिन्** पु० कोशे(षे)वसति वस—णिनि ७त०। कोषाभ्यन्तरस्थे जन्तुभेदे "कोशवासिनां पादिनां च तदेव" (अनुपानम्) सुश्रु० कोशस्थशब्दे विवृतिः

**कोश(ष)वृद्धि** पु० कोषस्य मुकुलस्य वृद्धिर्यत्र। १कुरण्डक वृक्षे। ६त०। २अण्डकोषवृद्धौ रोगभेदे ३धनसञ्चयवृद्धौ च स्त्री

**कोश(ष)शायिका** स्त्री कोषे(शे) पिधानमध्ये शेते शी ण्वुल् ७त० अतइत्त्वम्। क्षुरिकायां जटाधरः

**कोश(ष)स्कृत्** पु० कोशं(षं)करोति कृ—क्विप् नि० सुट्। कोषकारके जन्तुभेदे (गुटिपोका) "त्यजेत् कोश(ष)स्कृदिव